Title दीक्षाविधिः

Author

Extent ४ संवत १९५७

Subject धर्मशास्त्रम संपूर्णम

नं० ५६३६-घ नं० [illegible]

दीक्षाविधि: (धर्मशास्त्रम्)

पत्राणि ४ (चत्वारि) (संपूर्णम्)

संवत् १९५४

नं: ११७२

१२०

~~१२५~~

S 6 3 9

F - 3

Complete

नं ११६८ [illegible]
दीक्षाविधि
४ पत्राणि
[illegible]
(धर्मशास्त्र)
१९५४ सं०



ॐ श्रीगणेशाय नमः अथ दीक्षाप्रयोगः तत्र शिष्यः पूर्वमुपोषितः
१ कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् यथा अद्ये
त्यादि तिथ्यंतममुक गोत्र अमुक देवशर्मा धर्मार्थकाममोक्षप्रा
प्तिकाम अमुक देवता यामत्कर्त्तव्या ऽमुक मंत्रदीक्षामहं करि
ष्ये इति संकल्प्य गुरुं वृणुयात् तद्यथा ॐ साधु भवाना
ऽऽस्तां साध्वास्से ॐ अर्चयिष्यामो भवंतं ॐ अर्चय अर्चय
ततो गंधपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य दक्षिणजानु
पत्वा पठेत् ॐ अद्येत्यादि अमुकगोत्रो ऽमुकदेवशर्मा ऽमु
कदेवतायामत्कर्मैर्त्तव्या ऽमुकमंत्रदीक्षाकर्मणि अमु
कगोत्रं श्रीमद ऽमुकदेव शर्मा (ऽमुकदेवतायामत्कर्त्तव्या)

मीणानेभिः पाद्यादिभिरभ्यर्च्य गुरुत्वेनभवंतमहं वृणे वृतो
स्मीतिगुरुर्वदेत् प्रतिवचनंशिष्यो यथाविहितंकर्मकुरु इ-
तिवदेत् यथाज्ञानतः करवाणीतिगुरुः शिष्यस्यप्रतिवचनं त
तोगुरुराचम्य द्वारदेशेसामान्यार्घ्यीकृत्वा द्वारंसंपूज्य दीक्षा
स्थानंप्रविश्यआसनमास्तीर्य तत्रेशानेसिंदूरेणयंत्रंमूल
मुच्चरंल्लिखेद्यथा त्रिकोणंविंदुसंयुक्तंषट्कोणंवृत्तमंडलं
वस्वपत्रंत्रिवृत्तांकंभूपुरहेणोपशोभितं दीक्षायंत्रमिदंदेवि दी-
क्षाकालंप्रपूजयेत् तत्र ॐ क्लींश्रींगणेशायनमः पूर्वे रँ ध
र्मायनमः दक्षिणे रँ वरुणायनमः पश्चिमे रँ कुवेरायन
मः उत्तरे रँ आग्नेयेनमः अग्ने रँ नैऋतयेनमः नैऋते रँ —

रूँवायव्येवरुणायनमः रूँईशानायनमः इतिमूर्त्गर्हंसंपू
२ ज्य षट्कोणेषुवामावर्त्तेन रूँ मायायैनमः धँ मोहिन्यैन
मः रूँ मीनायैनमः रूँ मंगलायैनमः रूँसर्वमंगलायैनमः
2 रूँयंयमुनायैनमः रूँ संसरस्वत्यैनमः ईशानदिग्भागतःप्र
पूजयेत् मूलदेवींबिंदौ रूँसदाशिवायनमः रूँ महारौद्रा
यनमः रूँकामेशायनमः रूँ कमनेश्वरायनमः ततःअष्ट
पत्रेषुवामावर्तेन रूँ ब्राह्म्यैनमः एवंनारायण्यैनमः कौ
मार्यैनमः अपराजितायैनमः माहेश्वर्यैनमः चामुंडा
यैनमः वाराह्यैनमः नारसिंह्यैनमः (करालायनमः) त
तोष्टभैरवाः रूँ महाकालायनमः कालाग्नयेनमः कराला

यनमः विकरालायनमः संहारायनमः रुरवेनमःउन्म
त्तभैरवायनमः ईं ईशानायनमः इति यंत्रमभ्यर्च्यैवं गुरुंप्र
पूजयेत् ततोग्निकर्मपूर्वं कुंडं खनेत् योनिरूपंत्रिकोण
मराणिं प्रपूज्य वह्निमावाह्य ॐ रंरंरंअग्नेवैश्वानरप्रज्वल २
फट् स्वाहा इत्यावाहनंसंपूजयेच्च ततश्चाज्यंसंकृत्य तेनै
वाज्येन परामंत्रेणान्यमंत्रेणवाष्टोत्तरशतंजुहुयात् ततोदे
वीमावाह्य परांध्यात्वा प्राङ्मुखोगुरुरुत्तराभिमुखंशिष्यं वि
ष्टरशोधनादिकंकुर्यात् इतिकृत्वा ततःशिष्यदेहेभूतशुद्धिं
कुर्यात् तद्यथा मूलाधाराद्धंसइतिकुंडलिनींपृथिव्यासह
स्वाधिष्ठानेनीत्वा तत्रजलेपृथ्वीलीनांतस्मान्नीताजलंवह्नौ-

वह्निं वायौ वायुमाकाशे आकाशं मनसि मनो नादे नादं ध्वनौ ध्व
२ निं विचिंत्य तत्परमशिवे लीनं विचिंत्य (तद्भवा) यमिति वा-
3 युबीजेन पापपुरुषं संशोष्य रमिति वह्निबीजेन संदह्य वमि
ति वरुणबीजं शुक्लवर्णं सहस्रारे विचिंत्य तद्भवामृतेन शरीर
मुत्पाद्य लटेलाटस्थूलमिति पृथ्वीबीजेन पीतवर्णेन सुदृढीकृ
त्य सोहमिति मंत्रेण कुंडलिनीममृतलोलीभूतां पंचभूता
नि जीवात्मानं च ब्रह्मपथेन स्वस्वस्थाने नियोजयेत् ततो देव
तारूपमात्मानं विभाव्य शिष्यहृदि हस्तं निधाय प्राणप्रतिष्ठां
कुर्यात् ॐ आं ह्रीं क्रों हं सः अमुकदेवतायाः प्राणा इह प्राणाः जीव
इह स्थितः सर्वेंद्रियाणि इह स्थितानि वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्रा

णप्राणाःइहागत्यसुखंचिरंतिष्ठंतुस्वाहा इतिप्राणप्रतिष्ठांविधा
य प्राणायामत्रयंकारयेत् पुनराचमनत्रयं ततोमूलेनदिशो
वद्ध्वा सर्वतोग्निप्राकारंविचिंत्यपरांध्यायेत् गुरुःशिष्यायशांता
यपराप्रीत्येवक्त्रैःसमस्तं यंत्राग्रेदक्षकर्णमूलेशनैःशनैर्मूलमं
त्रंत्रिःवामेएकवारंसमर्पयेत् शिष्योपिदक्षिणादिनागुरुंतोष
येत् यथादरिद्रःकाकिनींदद्याद्दशग्रामाशतनाधिपः दशाधि
पश्चैकमेवयथाशक्तिप्रदीयते इतिशास्त्रोक्तवचनात् ततोव
ह्निंसमापयेत् इतिदीक्षाविधिःसूक्ष्मप्रकारेणसमाप्तमिति-
शिवम् ॥ ॥ सं. १९५४ श्रावणेमासि जम्मूमध्ये लिखा =

नं. १२८